# Shanti Stotram

# શાન્તિ સ્તોત્રમ્

## Document Information

Text title : shAntistotram

File name : shAntistotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Source : Mantra Maharnava 1924 part -4 baTukabhairava section

Latest update : October 9, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 4, 2022

*sanskritdocuments.org*

# શાન્તિ સ્તોત્રમ્

નશ્યન્તુ પ્રેતકૂષ્માણ્ડા નશ્યન્તુ દૂષકા નરાઃ ।
સાધકાનાં શિવાઃ સન્તુ સ્વામ્નાયપરિપાલનમ્ ॥ ૧॥

નન્દન્તુ માતરઃ સર્વા જયન્તુ યોગિનીગણાઃ ।
જયન્તુ સિદ્ધા ડાકિન્યો જયન્તુ ગુરુશક્તયઃ ॥ ૨॥

નન્દન્તુ હ્યણિમાદ્યાશ્ચ નન્દન્તુ ગુહ્યકાદયઃ ।
નન્દન્તુ ભૈરવાઃ સર્વે સિદ્ધવિદ્યાધરાદયઃ ॥ ૩॥

યે ચામ્નાયવિશુદ્ધાશ્ચ મન્ત્રિણઃ શુદ્ધબુદ્ધયઃ ।
સર્વદા નન્દયાનન્દં નન્દન્તુ કુલપાલકાઃ ॥ ૪॥

ઇન્દ્રાદ્યાસ્તર્પિતાઃ સન્તુ તૃપ્યન્તુ વાસ્તુદેવતાઃ ।
ચન્દ્રસૂર્યાદયો દેવાસ્તૃપ્યન્તુ ગુરુભક્તિતઃ ॥ ૫॥

નક્ષત્રાણિ ગ્રહા યોગાઃ કરણાદ્યાસ્તથાપરે ।
તે સર્વે સુખિનો યાન્તુ માસાશ્ચ તિથયસ્તથા ॥ ૬॥

તૃપ્યન્તુ પિતરઃ સર્વે ઋતવો સંવત્સરાદયઃ ।
ખેચરા ભૂચરાશ્ચૈવ તૃપ્યન્તુ મમ ભક્તિતઃ ॥ ૭॥

અન્તરિક્ષચરા ઘોરા યે ચાન્યે દેવયોનયઃ ।
સર્વે તુ સુખિનો યાન્તુ સર્વા નદ્યશ્ચ પક્ષિણઃ ॥ ૮॥

પર્વતાઃ સુખિનઃ સન્તુ તથા તત્કન્દરા ગુહાઃ ।
ઋષયો બ્રાહ્મણાઃ સર્વે શાન્તિં કુર્વન્તુ મે સદા ॥ ૯॥

તીર્થાનિ પશવો ગાવો યાશ્ચાન્યાઃ પુણ્યભૂમયઃ ।
વૃદ્ધાઃ પતિવ્રતા નાર્યઃ શિવં કુર્વન્તુ મે સદા ॥ ૧૦॥

શિવં સર્વત્ર મે ચાસ્તુ પુત્રદારધનાદિષુ ।
રાજાનઃ સુખિનઃ સન્તુ ક્ષેમમાર્ગે તુ મે સદા ॥ ૧૧॥

શુભા મે દિવસા યાન્તુ શિવાસ્તિષ્ઠન્તુ મે શિવાઃ ।
દ્વેષ્ટારઃ સાધકાનાં ચ સદૈવામ્નાયદૂષકાઃ ॥ ૧૨॥

ડાકિનીનાં મુખે યાન્તુ તૃપ્તાતૃપ્તાશ્ચ તેષુ તાઃ ।
શત્રવો નાશમાયાન્તુ મમ નિન્દાકરાઃ સદા ॥ ૧૩॥

યે નિન્દકા તે વિપદં પ્રયાન્તુ યે સાધકાસ્તે પ્રભવન્તુ સિદ્ધાઃ ।
યે સર્વવીરાઃ કરુણાવલોકાત્પુનઃ પુરાત્મન્મમ સન્નિધત્સ્વ ॥ ૧૪॥

ઇતિ શ્રીરુદ્રયામલે શાન્તિસ્તોત્રં સમ્પૂર્ણમ્ ।

From Mantra Maharnava part - 4

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by Gopal Upadhyay, PSA Easwaran

*Shanti Stotram*

pdf was typeset on July 4, 2022

Please send corrections to *sanskrit@cheerful.com*